12-येषु प्रदेशेषु अनावृष्टिकारणेन जलाभावात् कृषिः न प्रारभ्यते, तत्र शासनाधिकारिणः नद्याः जलं प्रतिरुध्य सेतुं बद्ध्वा महा-जलाशयान् निर्माय जल-सञ्चयं कुर्वन्ति।

13-तेभ्यः जलाशयेभ्यः क्षेत्रेषु जलं वितरन्ति।

14-अनेन तेषु प्रदेशेष्वपि सस्यं प्ररोहति, कृषीवलाः सम्पन्नाः सुखिनः च भवन्ति।

15-यथा पञ्चनद-प्रदेशे भाखडा-नङ्गलः, आन्ध्र-प्रदेशे तुङ्गभद्रा बन्धः, केरल-प्रदेशे मलम्पुषः, कर्णाटक राज्ये कृष्णराजसागरः, तमिलनाडु प्रदेशे मेट्टूरबन्धः - इति बहवः बन्धाः निर्मिताः।

16-एभ्यः बन्धेभ्यः विद्युत् अपि उत्पादिता भवति।

17-एषा जलमूला विद्युत् ‘हाइड्रो इलेक्ट्रिक पावर’ इति नाम्ना प्रसिद्धा।

18-पश्यत! नद्यः देशस्य कीदृशमुपकारं कुर्वन्ति।

19-अत एव जनाः ताः देवता-रूपेण पूजयन्ति।

20-स्व-स्व गृहेषु स्नानसमये अधुनापि सर्वासां नदीनां सान्निध्यं स्नान-जले प्रार्थयन्ति।

Sanskrit cümlelerin gramatik analizini yaparak Türkçeye çevirmek.